# वेदाङ्गस्य महत्वम्

**HARIPRASAD BHAT**

Research Scholar, Srinivasa Yoga Samskrit Research Centre, Mukka. Suratkal, Mangaluru

Email id – hergaharibhat@gmail.com

## सार: (ABSTRACT)

**समग्रेऽस्मिन् लेखने वेदस्यार्थगाम्भीर्यं, समुचितपदप्रयोगे पूर्वसूरिभिः कृतभूरिपरिश्रमः निरूपितो वर्तते। वेदावगमने वेदार्थावगमने वा उपकरणं विना न शक्यते इति निरूप्य उपकरणानि वेदाङ्गाङ्गानि प्रतिपादितानि। अङ्गं विना अङ्गिकल्पन यथा असम्भावितं तथा शिक्षादि शिक्षाद्यङ्गसाहाय्यं विना वेदः दुरूह्य एव स्यात्| अतः अङ्गभूतानि शिक्षादिषट् शास्त्राणि सप्रमाणं सलक्षणा निरूपितान्यत्र।अपि च पुराणादिविस्तृतवाङ्मयप्रपञ्चे षडङ्गानां परिचयः विवरणं च कुत्र उल्लिखितमिति च अत्र विवृतम्।**

### पूर्वपीठिका

अस्मिन्महनीये प्रपञ्चे पुरुषार्थचतुष्टयस्य साधको मानवो भवति । मनुष्याणां शरीरे यथा हस्तपादादयो विविधान्यङ्गानि भवन्ति तद्वद् धर्मार्थकाममोक्षाख्यचतुर्विधपुरुषार्थस्य प्रतिपादका वेदास्सन्ति । वेदा अपि अङ्गैरेव व्याक्रियन्ते अत एव चतुर्दशविद्यास्वङ्गानां चर्चा विद्यते ।

अङ्गशब्दस्य व्युत्पत्तिलभ्योऽर्थो भवति 'उपकारक' इति । तद्यथा ट्ट 'अङ्ग्यन्ते, ज्ञायन्ते अमीभिरिति अङ्गानि' । अत्रायमाशयः, यैः उपकरणैः कस्यापि वस्तुनः स्वरूपावगमने सहायतां प्राप्नोति तानि अङ्गानि भवन्ति । वेदस्तु स्वयमेव दुर्बोधः, दुरूहश्च विषयः भाषा-भावयोर्द्वयोरपि दृष्ट्या । निष्कर्षश्चात्रायं विद्यते यत्, वेदार्थज्ञाने तत्कर्मकाण्डस्य च प्रतिपादने च सक्षमं सार्थकं च यच्छास्त्रं तमेव विद्वांसो 'वेदाङ्ग' इति नाम्ना कथयन्ति, व्याहरन्ति च । तथा च वेदस्य, वेदार्थस्य च यथार्थ ज्ञानाय शिक्षादिषड्विषयान् सम्यगध्ययनस्य नितान्तं प्रयोजनं विद्यते ।

### विषनिरूपणम्

वेदसूक्तानां वेदमन्त्राणां वा उचितरूपेणोच्चारणं वेदाङ्गेषु प्रथमः कल्पः । अत एव शब्दमुख्यमन्त्राणां यथार्थरूपेणोच्चारणस्थापने बहु महत्वं दीयते । एतदर्थ प्रवर्तमाना व्यवह्रियमाणा च पद्धतिः वेदाङ्गस्य 'शिक्षा' इति कथ्यते । वेदस्य मुख्यतात्पर्यं, प्रयोजनं च वैदिकं कर्मकाण्डम् तथा यज्ञयागादेः यथार्थमनुष्ठानमस्ति । एतत्प्रयोजनाय प्रवृत्तमङ्गं 'कल्प' इति उच्यते ।अस्य शब्दस्य निष्पत्तिः एवं भवति, यज्ञ-यागादिप्रयोगाणां सदवसरे समर्थकं शास्त्रमिति । तद्यथा - ' कल्प्यते समर्थ्यते यागप्रयोगोऽत्र इति कल्पः' । व्याकरणमपि वेदाङ्गभूतमेव । तस्य शास्त्रस्य वेदानुकूलत्वं वेदार्थानुकूलत्वं आहोस्वित् वेदाङ्गत्वप्रयोजनं यथा ट्ट पदानां प्रकृतेःप्रत्ययस्य च विवरणं कृत्वा

पदस्वरूपस्य परिचयं करोति अर्थविश्लेषणं च । एतादृशाय महाफलाय व्याकरणशास्त्रस्योपयोगित्वात् तस्मिन्नपि शास्त्रे वेदाङ्गत्वं विद्यते ।

निरुक्तस्य कार्यमस्ति ट्ट पदानां निरुक्तिकथनं व्युत्पत्तिप्रदर्शनं च । निरुक्तेर्विभिन्नत्वात् अर्थोऽपि भिन्नः भवति । अतो वेदस्यार्थनिरुक्तस्य वेदाङ्गता सिध्यति । वेदः छन्दोमय्यां वाण्यां विद्यते, तत्परिचयं विना कथं वेदार्थावगमो भवेत् । परिचये प्राप्ते सत्येव मन्त्राणामुच्चारणस्य पाठस्य सम्यग् ज्ञानं भविष्यति ।

उदाहरणम् ट्ट वरुणविषये शुनःशेपऋषेः बहुचर्चितोऽयं मन्त्रः,

निषसाद धृतव्रतो वरुणः पस्त्याश्वा । साम्राज्याय सुक्रतुः ॥

अस्मिन् मन्त्रे त्रिपदा गायत्री छन्दोऽस्ति, यस्य प्रत्येकस्मिन् पादे अष्टावष्टाक्षराणि भवन्ति । छन्दसः एतद् विज्ञापनं मन्त्राणां उच्चारणाय अत्यावश्यकमस्ति । द्वितीये तृतीये च पादे आपाततः सप्तैवाक्षराणि सन्ति । अतः एनमष्टपदाविरचनाय पस्त्याश्वा इत्यस्योच्चारणं चतुरक्षरसमन्वितं भाव्यम् । तद्यथा ट्ट पस्त्या ट्ट सुआ, साम्राज्य इत्यस्याप्युच्चारणे पूर्वोक्तपद्धत्या 'साम्राजि आय' इति भविष्यति । अनेनैव प्रकारेण छन्दसः ज्ञानं मन्त्राणामुच्चारणायातीवावश्यकं भवति । छन्दसो वेदाङ्गतायामेतदेव कारणमस्ति ।

ज्यौतिषशास्त्रमपरं वेदाङ्गम् । ज्यौतिषशास्त्रं प्रत्यक्षमस्ति । तथाचोक्तं ट्ट प्रत्यक्षं ज्यौतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ इति । शास्त्रमिदं यज्ञ-यागस्य समुचितकालस्य निर्देशं करोति ।

श्रौतयागस्यानुष्टानं कस्मिन्नपि विशिष्टे नक्षत्रे च भाव्यम् । विवाहादि गृहकर्मणे नक्षत्रज्ञानं ज्यौतिषशास्त्रादेव प्राप्तुं शक्यते । अपरश्च ट्ट दीक्षाया विधानं कर्मकांडस्य महान् विषयः । अस्मिन् विषये कतिपयोदाहरणानि प्रस्तूयन्ते ।

यथा,

तैत्तिरीयब्राह्मणस्य कथनमस्ति यत्, कृत्तिकास्वग्निमादधीत । फाल्गुनीपूर्णिमायां दीक्षानां विधानमस्ति । कथनस्याभिप्रायोऽयमस्ति यत् ट्ट कर्मकाण्डीये प्रत्येकस्मिन् विधाने ट्ट नक्षत्रस्य, तिथेः, मासस्य, संवत्सरस्य च ज्ञानमावश्यकं कर्तव्यकोटिकं च भवति । एभिरुपर्युक्तैः कारणैः ज्यौतिषशास्त्रस्य वेदाङ्गत्वं सिध्यति ।

संक्षेपेण वेदाङ्गानां लक्षणं एवं संगृहीतुं शक्यते यत्, मन्त्राणां यथोचितोच्चारणाय शिक्षायाः,

कर्मकाण्डीय-यज्ञीययोरनुष्ठानाय कल्पस्य, शब्दस्वरूपव्युत्पत्यादीनां ज्ञानाय व्याकरणस्य,

समुचितार्थज्ञानाय शब्दानां स्फोटनपूर्वकं निर्वचनानिरुक्त्यै निरुक्तस्य, वैदिकछन्दसां सम्यग् ज्ञानाय छन्दसः,

विविधानुष्टानानां कालज्ञानाय ज्यौतिषस्य एतेषामङ्गानां यथार्थरूपेणोपयोगित्वात् 'वेदाङ्ग' इति कथयन्ति सार्वदेशीयविद्वांसः ॥

**वेदाङ्गसाहित्यस्य प्रयोजनम्**

वेदोऽस्माकं सनातनप्रजानां धर्मस्याधारभूतस्तंभ इव । अतःविद्वज्जनाः एनमतिशयेनादरेण, सम्मानेन, पावनेन दृष्ट्या चावलोकयन्ति । एतस्य महन्महत्वं को न विजानाति । यदा तर्ककुशलाः

नैयायिकाः अनुमानादीनामपि साहाय्येन न किमपि कर्तुं पारयन्ति यागादिना स्वर्गादि विषये , तदा तेषां वेद एव शरणं भवति । तथाचोक्तम्-

प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते ।
एनं विदन्ति वेदेन तस्मात् वेदस्य वेदता ॥

अस्य तादृशी विपुला प्रतिष्ठा तदुदयकालान्तरमेव समस्ते विश्वे प्रसृता बभूव । वेदस्यैकमप्यक्षरं पूतं ज्ञनवर्धकं च मन्यते । अत्र परिवर्तनं स्वरूपतश्च्युतिर्वा महतेऽपकाराय मन्यते स्म । एतादृश्यामवस्थायां वेदस्वरूपसंरक्षणायैव वेदाङ्गस्योदयो बभूव । ऋते वेदाङ्गात् शब्दानां अर्थानां च संरक्षणमसंभवमेवास्ति । अस्य सहयोगिनः साहित्यस्योदयः समुत्पत्तिर्वा उपनिषत्काले एव संजाता । अस्मिन् विषये मुण्डकोपनिषदेव प्रमाणम् ट्ट

शौनको ह वै महाशालोऽङ्गिरसं विधिवदुपसन्नः पप्रच्छ ।
कस्मिन् भगवो विज्ञाते सर्वमिदं विज्ञातं भवतीति ।
तस्मै सहोवाच । द्वे विद्ये वेदितव्ये इति ह स्म यद्
ब्रह्मविदो वदन्ति परा चैवापरा च । तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः
शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति ॥

अपरं च - अपरविद्यायां वेदचतुष्टयानन्तरं तेषां तेषां षडङ्गानां शिक्षा-कल्प-व्याकरण- निरुक्त- छन्दो ज्योतिषादीनां गणना विद्यते । एषु प्रत्येकस्य विपुलं वैशिष्ट्यं विद्यत इति न तिरोहितमस्ति विद्वन्मण्डले । अत एतेषामुपयोगिता सुतरामेव सिद्धा भवति । अस्य महतीमुपयोगितामवलोक्य महर्षिणा पाणिनिना पतञ्जलिना च स्वपाणिनीयशिक्षायां महाभाष्ये पस्पशाह्निके च सत्यमेवोक्तं यत्,

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥ ( पाणिनीय शिक्षा ४१-४२ )

ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च ( पस्पशाह्निके )

इत्येताभ्यां सूच्यते यत् ब्रह्मलोकस्य प्राप्तिः षडङ्गानामध्ययनेनैव भवतीति पारलौकिकी स्थितिः, लोके तु सर्वविदितमेव महत्वम् । अतः कारणेनविनाप्यध्ययनस्यास्यैव वेदाङ्गस्य महनीयता वर्तते न तु अन्येषां लौकिकशास्त्राणाम् । एतेन वेदाङ्गस्य लौकिकी-पारलौकिकी स्थितिः सुस्पष्टा भवति ॥

वेदाङ्गानां शास्त्रान्तरे वर्णनम्

वेदाङ्गेषु व्याकरणं प्रमुखमस्ति । अस्य विवेचनं नारदपुराणस्य पूर्वभागस्य द्वितीयपादस्यैकपञ्चाशत्तमेऽध्याये संक्षेपतया, रमणीयतया सुवर्णितम् । नारदपुराणस्य व्याकरणं ‘कातन्त्रव्याकरण’स्य सारभूतमस्ति, यं माहेश्वरं अथवा कौमारं व्याकरणं कथयन्ति विद्वज्जनाः । अपि च अग्निपुराणस्य ३४९ तमादध्यायात् ३५९ तम अद्यायपर्यन्तं व्याकरणशास्त्रस्य विवरणं विद्यते ।

छन्दःशास्त्रस्य अथवा पिङ्गलशास्त्रस्य वर्णनं गरुडपुराणस्य २०७ तम अध्यायात् २१२ तम अध्याय पर्यन्तं दरीदृश्यते । अपि च नारदपुराणस्य पूर्वभागस्य द्वितीयपादस्य सप्तपञ्चाशत्तमेऽध्याये वैदिकानां ट्ट लौकिकानां च छन्दसां वर्णनमस्ति । अनेनैव प्रकारेण अग्निपुराणस्य २२८ तमाध्यायात् ३३५ तमाध्यायपर्यन्तं छन्दःशास्त्रस्य विशदं निरूपणं प्राप्यते ।

ज्यौतिषशास्त्राध्ययनाय नारदपुराणस्य विष्णुधर्मोत्तरस्य च विवेचनमतीव महत्वपूर्णमस्ति । नारदपुराणे त्रिस्कन्धज्योतिषस्य सिद्धान्तसंहिताहोरात्मकस्य कमनीयं निरूपणमस्ति । यत् ट्ट 'नारदीयं ज्यौतिषं' इति नाम्नैव विख्यातम् ।

निरुक्तसंबन्धिनः विषयाः पुराणेषु न्यूनं दृश्यन्ते । नारदपुराणस्य पूर्वभागस्य द्वितीयपादस्य त्रिपञ्चाशत्तमेऽध्याये निरुक्तसंबन्धिताः कतिपयश्लोकाः वर्तन्ते, ये मुख्यतया व्याकरणशास्त्रस्य स्वरवैदिकप्रक्रियातो धातुप्रकरणाच्चाभिन्नाः प्रतीयन्ते ।

वेदादीनां पाठविधानस्य, स्वराणामुच्चारणविधेः, सामवेदस्य गान-प्रक्रियायाः वर्णानां स्पष्टोच्चारणस्य विधिर्यस्मिन् शास्त्रे वर्णिताः स्युः तच्छास्त्रं 'शिक्षाशास्त्रम्' । अस्य शास्त्रस्य प्रयोजनं तैत्तिरीयोपनिषदि एवमुक्तमस्ति-

अथ शिक्षां व्याख्यास्यामः ट्ट वर्णः, स्वरः, मात्रा, बलम्, साम, सन्तान इत्युक्तः शिक्षाध्यायः

तत्र वर्ण इति पदेनाकारादेः ग्रहणम्, स्वर इत्यनेन उदात्तादेः, मात्रया ह्रस्व-दीर्घ- प्लुतानां, बलेन स्थानप्रयत्नौ गृह्येते, साम्ना निषादादिः, सन्तानेन विकर्षणादिः इति प्रयोजनमप्युक्तम् । अपि च शिक्षाशास्त्रस्य वर्णनं नारदपुराणस्य पूर्वभागस्य द्वितीयपादस्य पञ्चाशत्तमेऽध्याये प्रायः शतत्रयश्लोकेषु तथा चाग्निपुराणस्य ३३६ तमेऽध्याये विद्यते ।

कल्पानां वर्णनं तु प्रायः पुराणेषु विद्यमानमस्ति । कल्पेऽस्मिन् वैदिकानां लौकिकानां च कर्मकाण्डानां समन्वयः दृश्यते । येषु श्रौतसूत्रं,गृह्यसूत्रं, स्मार्तसूत्रं, शुल्बसूत्रं इतिचेमानि चत्वारि गृहीतानि भवन्ति । ऋग्वेदप्रातिशाख्ये वर्गद्वयवृत्तौ कल्पविषये कथितमस्ति यत्-

कल्पो वेदविहितानां कर्मणामानुपूर्वेण कल्पनाशास्त्रम्

अत्रायं निष्कर्षो विद्यते यत् येषां यज्ञ-यागादिविहितानां विवाहोपनयनादिकर्मणां च महत्वपूर्णं प्रतिपादनं वैदिक ग्रन्थेषु कृतमस्ति तेषां सूत्रग्रन्थानामभिधानमस्ति कल्पः । इमानि सूत्राणि प्राचीनतमानि एतदर्थं मन्यन्ते । यतो हि एतानि स्व-स्वविषयप्रतिपादने ब्राह्मणारण्यकैस्सह तैरन्तर्येण संबद्धानि सन्ति । कल्पशास्त्रस्य वर्णनं भविष्यपुराणे सर्वाधिकमस्ति । येषु यज्ञस्य, इष्टापूर्तेः, संस्कारस्य विधयो वर्णिताः सन्ति ।

तद्यथा च कल्पानां पञ्चभेदाः सन्ति । ते तु - नक्षत्रकल्पः, वैतानकल्पः , संहिताविधानकल्पः, आङ्गिरसकल्पः, शान्तिकल्पश्चेति ।

अत्र नक्षत्रकल्पे ट्ट यज्ञ-संस्कारादीनांकर्मणां मुहूर्तानां च निर्णयो भवति ।

वैतानकल्पे ट्ट हविर्यज्ञ ट्ट सोमयज्ञ- पाकयज्ञानां साङ्गोपाङ्गविधिर्निरूपिता विद्यते ।

संहिताकल्पे - विशेषतो वेदनिर्दिष्टानामश्वमेध-राजसूयादियज्ञानां तद्भिन्नानाञ्चापि सर्वविधीनां सम्पादनप्रक्रिया प्राप्ता भवति ।

आङ्गिरसकल्पे - शत्रुराष्ट्रेभ्यो मारणस्य, मोहनस्य, वशीकरणस्य उच्चाटनाद्याभिचार कर्मणां च निर्देशोऽस्ति ।

शान्तिकल्पे - दैवान्तरिक्षाद्भुताद्युत्पातानामीतिभीत्यादिभयानां निवारणस्य, एवञ्च शत्रुराष्ट्रैः कृतनां, मारण-मोहनादिप्रयोगाणां शान्ति विधीनां वर्णनं विद्यते ।

## उपसंहारः

एतादृशस्य षडङ्गयुक्तस्य वेदाध्ययनस्य परम्परा आसहस्रवर्षात् अस्मिन् भरतखण्डे अनुस्यूततया दृश्यते । पारलौकिकपरब्रह्मस्थानैक काम्येन षडङ्गसहितवेदविद्यार्जनं अधुनापि क्रियते इतीदं प्रमोदावहो विषयः ।

## Bibliography


1. ऋग्वेदसंहिता – मैसूरुमहाराजसंस्थानद्वारा प्रकटितोऽयं ग्रन्थः। कन्नडभाषायां विद्यमानेऽस्मिन् ग्रन्थे व्याख्यानं , विस्तृतपीठिका च वर्तते।
2. धर्मशास्त्रक का इतिहास – Dr. P.V Kane
3. संस्कारमहोदधिः – Dr. A Ananthanarismhachar
4. हिन्दुधर्मकोशः – Raajabali Pandeya
5. धर्मकोशः – Lakshminarasimha Joshi